वेद स याति परमां गतिम्"। गतिं ब्रह्मसायुज्यमिति सूर्य्यसिद्धान्तेऽपि "दिव्यचक्षुर्ग्रहर्क्षाणां दर्शितं ज्ञानमुत्तमम्। विज्ञायार्कादिलोकेषु स्थानं प्राप्नोति शाश्वतम्" वराहसंहितायामपि "न साम्वत्सरपाठी च नरके परिपच्यते। ब्रह्मलोके प्रतिष्ठाञ्च लभते दैवचिन्तक" इति गणकस्य पत्नी ङीष् गणकी तत्पत्न्यां जटा०। "तस्मिन् मग्नं गणक! कथय क्षिप्रमम्भः प्रमाणम्" "गणक! पवनवेगादेकदेशे स भग्नः" लीला०। "गणकचक्रचूड़ामणिः" सि० शि०। "चर्म्मकारस्य द्वौ पुत्रौ गणको वाद्यपूरकः" इत्युक्ते २सङ्कीर्णजातिभेदे प्रजापतिपुत्रे तारापुञ्जात्मके अष्टसंख्यके ४केतुभेदे "तारापुञ्जनिकाशा गणका नाम प्रजापतेरष्टौ" वृह० सं० ११ अ०।

**गणकर्णिका** स्त्री गणस्य गणेशस्य कर्ण इव पत्रमस्याः कप् अत इत्त्वम्। इन्द्रवारुण्याम् राजनि०।

**गणकार** पु० गणं धात्वादिगणपाठं करोति कृ—अण्। धात्वादिगणार्थप्रतिपादके १ग्रन्थकर्त्तरि २भीमसेने शब्दच०।

**गणकारि** पु० गणं धात्वादिगणं करोति कृ बा० इञ्। धात्वर्थप्रतिपादकग्रन्थकर्त्तरि। ६त० गणकस्यारिश्च। तस्यापत्यं कुर्वा० ण्य। गाणकार्य्य तदपत्ये पुंस्त्री।

**गणकूट** पुंन० गणरूपं कूटम्। वरकन्ययोर्नक्षत्रभेदेन जातयोः विवाहे मेलनोपयोगिनि सुरराक्षसमानुषरूपे कूटे। उपयमशब्दे १२५० पृ० विवृतिः।

**गणचक्रक** न० गणानां धार्मिकगणानां चक्रमत्र कप्। धार्म्मिकानां सम्भूय भोजने त्रिका०।

**गणता** गणस्य भावः तल्। गणसमूहे।

**गणतिथ** त्रि० गण+असंख्यावाचकत्वेऽपि पूरणे डट् तिथुगागमश्च। गणानां पूरणे।

**गणदीक्षिन्** पु० गणान् दीक्षयति दीक्ष—णिनि। १बहुयाजके। "वेणाभिशस्तवार्द्धुषि गणिका गणदीक्षिणाम्" अभक्ष्यान्नकथने याज्ञ०। "गणदीक्षिणो बहुयाजकाः" मिता० २गणेशदीक्षकावति त्रि० स्त्रियां ङीप्।

**गणदेवता** स्त्री गणभूता सङ्घभूता देवता। सङ्घभूते देवभेदे "आदित्यविश्वे वसवस्तुषिता भास्वरानिलाः। महाराजिकसाध्याश्च रुद्राश्च गणदेवताः। आदित्या द्वादश प्रोक्ता विश्वे देवा दश स्मृताः। वसवश्चाष्टसंख्याताः षट्त्रिंशत् तुषिता मताः। आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः। महाराजिकनामानो द्वेशते चापि विंशतिः। साध्या द्वादशविख्याता रुद्राश्चैकादश स्मृताः। एते च संहता देवास्तत्रादित्याः स्वनामतः" जटाधरकोषः।

**गणद्रव्य** ६त०। गणस्वामिके द्रव्ये। गणं गणीभूतं द्रव्यं द्रव्याणां गणे च।

**गणद्वीप** पुंन० गणानां सप्तानां राज्यत्वात् द्वीपः। सप्तानां राज्यरूपे द्वीपभेदे "यत्नवन्तो गणद्वीपं सप्तराज्योपशोभितम्" रामा० कि० ४०३०अ०। यवद्वीपमिति पाठान्तरम्।

**गणन** न० गण—भावे ल्युट्। सङ्ख्याकरणे सङ्ख्याने (गोणा) "येनैव लिखितं कुर्य्यात् तेनैव गणनं भवेत्" विश्वसारत०। युच्। गणनाप्यत्र स्त्री। "यदि त्रिलोकी गणनापरा स्यात्" नैष० "व्याजपर्वगणनामिवोद्वहन्" रघुः

**गणनाथ** पु० गणानां प्रमथादीनां नाथः। १गणेशे २शिवे च गणनायकादयोऽप्यत्र। ३बहूनां स्वामिनि त्रि०। गणनायिका स्त्री ३दुर्गायाम् त्रिका०।

**गणनीय** त्रि० गणयितुमर्हति गण—अनीयर्। गणनार्हे अमरः। यत्, गण्य, तव्य गणितव्य तदर्थे त्रि०।

**गणपति** पु० ६त०। गणेशे तस्याविर्भावकथा इभाननशब्दे ९८१पृ० गजाननशब्दे २४९५पृ०च उक्ता तस्य गणविपतित्वं याज्ञवल्क्येनोक्तं तच्च वाक्यं गणपतिकल्पशब्दे दृश्यम् २शिवे ३समूहपतौ च "गणानां त्वा गणपतिम्" यजु० १६।१८।

**गणपतिकल्प** पु० गणपत्युद्देशेन कल्पः विधानभेदः। गणेशोद्देशेन विघ्नविघाताय मतृस्नपनादिरूप, विधानभेदे। स च कल्पः याज्ञ० उक्तो यथा।

"विनायकः कर्म्मविघ्नसिद्ध्यर्थं विनियोजितः। गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा। तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत। स्वप्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति। काषायवाससश्चैव क्रव्यादांश्चाधिरोहति। अन्त्यजैर्गर्द्दभैरुष्ट्रैः सहैकत्रावतिष्ठते। व्रजन्नपि तथात्मानं मन्यतेऽनुगतं परैः। विमना विफलारम्भः संसीदत्यनिमित्ततः। तेनोपसृष्टो लभते न राज्यं राजनन्दनः। कुमारी न च भर्त्तारमपत्यं न च गर्भिणी। आचार्य्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा। वणिग्लाभं न चाप्नोति कृषिञ्चैव कृषी बलः। स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्वकम्। गौरसर्षपकल्केन साज्येनोत्सादितस्य च। सर्वौषधैः सर्वगन्धैः प्रलिप्तशिरसस्तथा। भद्रासनोपविष्टस्य स्वस्ति वाच्या द्विजाः शुभाः। अश्वस्थानाद्गजस्थानाद्वल्मी-